[४१०] ठञ्प्रकरणे तदस्मिन् वर्तत इति नवयज्ञादिभ्य उपसङ्ख्यानम् । (म. भा. २.२७७)

नवयज्ञोऽस्मिन् वर्तते नावयज्ञिकः [1]कालः । [2]पाकयज्ञिकः (म. भा. २.२७७) ।

[४११] पूर्णमासादण् । (म. भा. २.२७७)

पूर्णमासोऽस्यां वर्तते 'पौर्णमासी तिथिः[3]' (मै. ५.६.९) ॥

## पितृव्यमातुलमातामहपितामहाः । (३६/१२४२)

पितृव्यादयो[4] निपात्यन्ते । समर्थविभक्तिः, प्रत्ययः, प्रत्ययार्थोऽनुबन्धः [5]इति सर्वं निपातनाद् [6]विज्ञेयम् । [7]पितृमातृभ्यां भ्रातर्यभिधेये व्यत् डुलच् इत्येतौ प्रत्ययौ निपात्येते (म.भा. २.२७७) । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । ताभ्यां पितरि डामहच् मातरि षिच्च । ताभ्यामेव [8]पितरि डामहच् प्रत्ययो [9]भवति । पितुः पिता पितामहः । मातुः पिता मातामहः । मातरि षिच्च । पितामही । मातामही ।

[४१२] अवेर्दुग्धे सोढदूसमरीसचो [10]वक्तव्याः । (म. भा. २.२७८)

अवेर्दुग्धम् अविसोढम्, अविदूसम्, अविमरीसम् (म. भा. २.२७८) ।

[४१३] तिलान्निष्फलात् [11]पिञ्जपेजौ प्रत्ययौ वक्तव्यौ । (म. भा. २.२७८)

निष्फलस्तिलः तिलपिञ्जः, तिलपेजः ।

[४१४] पिञ्जश्छन्दसि डिच्च । (म. भा. २.२७८)

'[12]तिल्पिञ्जं दण्डनं नडम्' (अ. वे. १२.२.५४) ॥

## तस्य समूहः । (३७/१२४३)

तस्य इति षष्ठीसमर्थात्[13] समूहः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । किमिहोदाहरणम् ? चित्तवदाद्युदात्तमगोत्रं यस्य च नान्यत् [14]प्रतिपदं ग्रहणम् । अचित्तात् ठक् (४.२.४७/१२५६) वक्ष्यति, 'अनुदात्तादेरञ्' (४.२.४४/१२५३), गोत्राद् वुञ् (४.२.३९/१२४६), प्रतिपदं च 'केदाराद् यञ्च' (४.२.४०/१२४८) इत्येवमादि, तत्परिहारेणात्रोदाहरणं द्रष्टव्यम् । काकानां समूहः काकम् । [15]बाकम् । 'इनित्रकट्यचश्च' (४.२.५१/१२६०) इति यावत् समूहाधिकारः ।

[४१५] [16]गुणादिभ्यो ग्रामज् वक्तव्यः ।

गुणग्रामः । करणग्रामः ।

गुण । करण । तत्त्व । [17]शब्द । इन्द्रिय । आकृतिगणः ॥

---

1. शरत्कालः फ. ह. 2. पाकयज्ञिकं गृहम् फ. 3. इति इत्यधिकम् ड. 4. शब्दाः इत्यधिकम् फ. ह. 5. तत् फ. 6. सिद्धम् ह. 7. पितृभ्यां फ. 8. पितरि नास्ति फ. 9. भवति नास्ति क. 10. प्रत्ययाः इत्यधिकम् ब. क. फ. 11. पिञ्चपैञ्जौ क. 12. तिल्पिजः ब. 13. प्रातिपदिकात् इत्यधिकम् ह. 14. प्रतिपदविधानमस्ति क. ग. ह. 15. शौकम् इत्यधिकम् ब. क. फ. ह, बालाकम् इत्यधिकम् ह. 16. गुणादिभ्यः – ग्रामः नास्ति ब. क. ह. 17. शब्द नास्ति फ.